# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ६७

तस्य तद्वचनं श्रुत्वा रामस्याक्लिष्टकर्मणः ।
अवाक्शिरास्तथाभूतो वाक्यमेतदुवाच ह ॥ १॥

शूद्रयोन्यां प्रसूतोऽस्मि तप उग्रं समास्थितः ।
देवत्वं प्रार्थये राम सशरीरो महायशः ॥ २॥

न मिथ्याहं वदे राजन्देवलोकजिगीषया ।
शूद्रं मां विद्धि काकुत्स्थ शम्बूकं नाम नामतः ॥ ३॥

भाषतस्तस्य शूद्रस्य खड्गं सुरुचिरप्रभम् ।
निष्कृष्य कोशाद्विमलं शिरश्चिच्छेद राघवः ॥ ४॥

तस्मिन्मुहूर्ते बालोऽसौ जीवेन समयुज्यत ॥ ५॥

ततोऽगस्त्याश्रमपदं रामः कमललोचनः ।
स गत्वा विनयेनैव तं नत्वा मुमुदे सुखी ॥ ६॥

सोऽभिवाद्य महात्मानं ज्वलन्तमिव तेजसा ।
आतिथ्यं परमं प्राप्य निषसाद नराधिपः ॥ ७॥

तमुवाच महातेजाः कुम्भयोनिर्महातपाः ।
स्वागतं ते नरश्रेष्ठ दिष्ट्या प्राप्तोऽसि राघव ॥ ८॥

त्वं मे बहुमतो राम गुणैर्बहुभिरुत्तमैः ।
अतिथिः पूजनीयश्च मम राजन्हृदि स्थितः ॥ ९॥

सुरा हि कथयन्ति त्वामागतं शूद्रघातिनम् ।
ब्राह्मणस्य तु धर्मेण त्वया जीवापितः सुतः ॥ १०॥

उष्यतां चेह रजनीं सकाशे मम राघव ।
प्रभाते पुष्पकेण त्वं गन्ता स्वपुरमेव हि ॥ ११॥

इदं चाभरणं सौम्य निर्मितं विश्वकर्मणा ।
दिव्यं दिव्येन वपुषा दीप्यमानं स्वतेजसा ।
प्रतिगृह्णीष्व काकुत्स्थ मत्प्रियं कुरु राघव ॥ १२॥

दत्तस्य हि पुनर्दानं सुमहत्फलमुच्यते ।
तस्मात्प्रदास्ये विधिवत्तत्प्रतीच्छ नरर्षभ ॥ १३॥

तद्रामः प्रतिजग्राह मुनेस्तस्य महात्मनः ।
दिव्यमाभरणं चित्रं प्रदीप्तमिव भास्करम् ॥ १४॥

प्रतिगृह्य ततो रामस्तदाभरणमुत्तमम् ।
आगमं तस्य दिव्यस्य प्रष्टुमेवोपचक्रमे ॥ १५॥

अत्यद्भुतमिदं ब्रह्मन्वपुषा युक्तमुत्तमम् ।
कथं भगवता प्राप्तं कुतो वा केन वाहृतम् ॥ १६॥

कुतूहलतया ब्रह्मन्पृच्छामि त्वां महायशः ।
आश्चर्याणां बहूनां हि निधिः परमको भवान् ॥ १७॥

एवं ब्रुवति काकुत्स्थे मुनिर्वाक्यमथाब्रवीत् ।
शृणु राम यथावृत्तं पुरा त्रेतायुगे गते ॥ १८॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com